शरीराग्निम् [illegible] उरसि [illegible] मन्द्रं वायुं प्रेरयति । मारुतस्तु उरसि चरन् [illegible] वायुं प्रेरयति । ततः स ऊर्ध्वगतोवायुः मूर्द्धानं यावत् स्वरम् उत्पादयति । ततः स ऊर्ध्वगतोवायुः मूर्द्धानं यावत् उपरितनीं गतिं प्राप्य, शिरः कपालेन अवष्टब्धत्वात् पुनः प्रत्यावृत्य वक्त्रमेव आपाद्य वर्णानुत्पादयति । तेषां वर्णानां विभागः पंचधा स्मृतः, यथा स्वरतः, कालतः, स्थानात्, आभ्यन्तरप्रयत्नात्, बाह्यप्रयत्नाच्च । इत्थं महर्षिणा पाणिनिना अतीववैज्ञानिकं निरूपणं कृतं, भाषाविषयक-वर्णोत्पत्ति-सिद्धान्तस्य ॥

## 3.2. भाषाणां वर्गीकरणम्

## (Classification of Languages)

**प्रश्नः 114. भाषाणां वर्गीकरणमभिलक्ष्य आकृतिमूलकं परिवारमूलकं च वर्गीकरणं प्रदर्शयत ।**

**उत्तरम्**–सम्प्रति संसारेऽस्मिन् त्रिसहस्र (3000) भाषाः प्रचलन्ति । एताषां सर्वासाम् भाषाणां द्विधा वर्गीकरणं कृतमस्ति भाषाविद्भिः–

(i) आकृतिमूलकं वर्गीकरणम्, (ii) पारिवारिकम् वर्गीकरणञ्च ।

(i) **आकृतिमूलकं वर्गीकरणम्**—वर्गीकरणस्यास्याधारः सम्बन्धतत्त्वमस्ति । प्रो. देवेन्द्रनाथ-शर्मा-महोदयेन आकृतिमूलकं वर्गीकरणमेव रूपात्मकं वर्गीकरणमिति स्वीकृतम् । वर्गीकरणेऽस्मिन् वाक्यानां पदानाञ्च अध्ययनं क्रियते । एतदनुसारेणात्र वर्गद्वयम् उपलभ्येते,–(क) अयोगात्मिकाः भाषाः, (ख) योगात्मिकाः भाषाश्च । योगात्मिके-भाषासंवर्गे पुनस्त्रिविधाः उपवर्गाः सन्ति—1. अश्लिष्टाः, 2. श्लिष्टाः, 3. प्रश्लिष्टाश्च । भाषाविज्ञानदृष्ट्या वर्गीकरणमिदम् अवैज्ञानिकम् असमीचनञ्चावलोक्यते । एतदपेक्षया पारिवारिकं वर्गीकरणम् अतीव समुन्नतं वैज्ञानिकञ्चास्ति ।

(ii) **पारिवारिकं वर्गीकरणम्**—भाषायाः पारिवारिकं वर्गीकरणमतीव वैज्ञानिकमस्ति । वर्गीकरणेऽस्मिन् रचनातत्त्वम् अर्थतत्त्वञ्च समानरूपेण आलोच्येते । ध्वनिः, पदरचना, वाक्यसंरचना, अर्थः, शब्दसम्पत्तिः, स्थानसान्निध्यं च एतेषु षट्सु विषयेषु साम्ये सति भाषाणाम् एकः परिवारः भवति । डॉ. देवेन्द्रनाथशर्मा महोदयः वर्गीकरणेऽस्मिन् अष्टादशभाषा-परिवाराणां नामानि निर्दिशति—

1. भारतयूरोपीय-(भारोपीय)-परिवारः, 2. द्राविड-परिवारः, 3. बुरुशस्कीपरिवारः, 4. यूराल-अल्टाईपरिवारः, 5. काकेशी-परिवारः, 6. चीनी-परिवारः, 7. जापानीकोरियाई-परिवारः, 8. अत्युत्तरी-हाइपरबोरीपरिवारः, 9. बास्कपरिवारः, 10. सामी-हामी-परिवारः, 11. सूडानी-परिवारः, 12. बान्टू-परिवारः, 13. होतेन्तोत-बुशमैनी-परिवारः, 14. मलयबहु-द्वीपीय-परिवारः, 15. पापुई-परिवारः, 16. आस्ट्रेलियाई-परिवारः, 17. द. पू. एशियाई-परिवारः, 18. अमरीकी-परिवारश्च ॥

**प्रश्नः 115. आकृतिमूलकस्य वर्गीकरणस्य समीक्षात्मकं स्वरूपम् उपस्थापयत ।**

**उत्तरम्**—आकृतिमूलकं वर्गीकरणं बहुविधमालोचितं विद्वद्भिः, यथा प्रस्तूयतेऽत्र—

(i) जगतः त्रिसहस्रभाषाणां त्रिषु चतुर्षु वा वर्गेषु समायोजनं समीचीनं नास्ति ।

(ii) वर्गीकरणेऽस्मिन् भाषाणां रचना, प्राचीनता, भौगोलिकस्थित्यादिकाः विषयाः विवादास्पदाः सन्ति ।

(iii) वर्गीकरणेऽस्मिन् भाषाणां केवलं बाह्यपक्षमेव निरूपितमस्ति ।

(iv) आकृतिमूलकस्य वर्गीकरणस्य व्यावहारिक्युपयोगिता नास्त्येव ।

(v) जगति एतादृश्यपि भाषाः अवलोक्यन्ते, यासां आकृतिमूलकवर्गीकरणस्य कस्मिंश्चिदपि वर्गे समावेशः भवितुं न शक्नोति ।

(vi) वर्गीकरणप्रक्रियायां काचन् असम्बद्धभाषाणामपि एकस्मिन्नैववर्गे सन्निवेशः प्राप्यते ।

(vii) वर्गीकरणस्यास्य कापि भाषा कस्यापि वर्गस्य प्रतिनिधिभाषा नास्ति ।

(viii) एकस्य वर्गस्य भाषयिकलक्षणाः अन्यवर्गीयाः भाषासु संक्रमिताः सन्ति ।

(ix) अनेन वर्गीकरणेन भाषाणां विकासक्रमो नहि ज्ञातुं शक्यते ।

इत्थं सुस्पष्टमिदं यत् जगतः बहुविधभाषाणाम् अध्ययनाय भाषावैज्ञानिकाः यद् आकृतिमूलकं वर्गीकरणमकार्षुः तस्मिन् बहवः दोषाः सन्ति । अत एव वैज्ञानिक-दृष्ट्यभावादेव भाषाविज्ञानविदः तद्वर्गीकरणं तत्यजुः ॥

**प्रश्नः 116. भेदोपभेदपुरस्सरम् आकृतिमूलकं वर्गीकरणं निरूपयत ।**

**उत्तरम्**—आकृतिस्तु रूपस्यैव पर्यायः । अत एव रूपात्मकमथवा रचनात्मकं वर्गीकरणमेव आकृतिमूलकं वर्गीकरणमित्यभिधीयते । भाषायाः निर्मितिस्तु पदाधीनाऽस्ति, अत एव वर्गीकरणमिदं पदात्मकवर्गीकरणमपि कथ्यते । पदस्य पदानां वा निर्मितिस्तु प्रकृति-प्रत्यय-योगेन भवति, अथवा उपसर्ग-प्रकृति-प्रत्ययानामेकत्र उपस्थितिरेव पदमित्यभिधीयते, यथा—प्र + चर् + घञ् (अ) = प्रचार' । एवमेव प्र + हृ + घञ् (अ) = 'प्रहार' इत्यादिः । अत्र आकृतिमूलकस्य वर्गीकरणस्य सम्बन्धस्तु पदानां बाह्याकृत्या रचनया वा भवति, न तु अर्थतत्त्वेन । श्लेगल-महोदयस्य अनुसारेण वर्गीकरणेऽस्मिन् द्वौ वर्गौ स्तः । बॉप-महोदयेन त्रयः वर्गाः, तथा पॉट-महोदयेन चत्वारः वर्गाः कृताः; किन्तु प्राधान्यम् श्लेगल-महोदयस्य वर्गद्वयस्यैवास्ति—

(i) अयोगात्मकं (Isolating), (ii) योगात्मकञ्च (Agglutinative) । अयोगात्मके भाषासंवर्गे चीनी, सूडानी, बर्मी, अनामी इत्यादयः भाषाः सन्निहिताः सन्ति । योगात्मके भाषासंवर्गे तु त्रयः उपवर्गाः अवलोक्यन्ते, यथा—

(i) अश्लिष्टयोगात्मकम् (Non-inflecting Agglutinative)

(ii) श्लिष्ट-योगात्मकम् (Inflecting Agglutinative)

(iii) प्रश्लिष्ट-योगात्मकम् (Incarporating Agglutinative).


अश्लिष्टयोगात्मकं पुनः चतुर्षुविभागेषु विभक्तमस्ति,—

1. पूर्वयोगात्मकम् (Prefix Agglutinative),
2. मध्य-योगात्मकम् (Infix Agglutinative),
3. अन्तयोगात्मकम् (Suffix Agglutinative),
4. पूर्वान्तयोगात्मकञ्च (Prefix-Suffix Agglutinative).

अध्ययनसौकर्यदृष्ट्या आकृतिमूलकं भेदोपभेदयुतं रेखांकितं वर्गीकरणमप्यत्र प्रस्तूयते—

Scanned with OKEN Scanner

## आकृतिमूलकं वर्गीकरणम्
## (Morphological Classification)




**प्रश्नः 117. का नाम अयोगात्मकभाषा ? चीनीभाषा-मनुसृत्य संक्षेपेण निरूपयत ।**

**उत्तरम्**—यस्यां भाषायाम् उपसर्गाणां प्रत्ययानां वा संयोगेन शब्दरचना नहि क्रियते, सैव भाषा अयोगात्मिका-भाषा (Positional or Isolating Language) इत्यभिधीयते । चीनी-भाषा, अयोगात्मकभाषाणां प्रतिनिधिभाषाऽस्ति । अस्यां भाषायां केवलं प्रकृतयः एव भवन्ति, न तु प्रत्ययाः; यतः प्रकृतयः सर्वेषां शब्दानां कार्याणि सम्पादयन्ति । सर्वेशब्दाः सर्वास्वस्थासु अव्ययवत् समानाकाराः एव भवन्ति । विभक्तेरभावात् प्रकृतिषु किमपि परिवर्तनं न भवति । अत एव भाषेयम् एकाक्षरी-भाषा इति अभिधीयते भाषाविद्भिः । अत्र न केवलं विभक्तेरभावः, अपितु संज्ञा-सर्वनाम-क्रिया-क्रियाविशेषणादिकाः विभागाः नैव दृश्यन्ते । स्थानभेदेन एव अर्थभेदः भवति । यथा

चीनी, अनामी, सूडानी, बर्मी, स्यामी, तिब्बती, मलयादिकाः अयोगात्मिकाः एकाक्षरी वा भाषाः सन्ति ॥

**प्रश्नः 118. नामनिर्देशपुरस्सरं परिवारमूलकं वर्गीकरणं निरूपयत ।**

**उत्तरम्**—विश्वस्य सर्वाषाम् भाषाणां विविधेषु भाषा-परिवारेषु सन्निवेशः एव पारिवारिक-वर्गीकरणस्य संज्ञां लभते । भाषाणां वर्गीकरणमिदमतीववैज्ञानिकं तथ्यात्मकं चास्ति । ध्वनिसाम्यं, शब्दसाम्यं, पदसाम्यं, वाक्यसाम्यम्, अर्थसाम्यं च वर्गीकरणस्यास्य आधारभूताः स्तम्भाः सन्ति । एतेषां साम्ये सति भाषाणाम् स्वकीयः एकः परिवारः भवति । डॉ. देवेन्द्रनाथ शर्मा-महोदयेन स्वीकृतं प्रतिपादितञ्च अष्टादश-भाषा-परिवार-विषयकं स्वरूपम् अधोलिखितमस्ति—

1. **भारोपीय-(भारत-यूरोपीय) परिवारः**

Scanned with OKEN Scanner